स्थित: । यथा, भागवते । १ । २ । ३३ ।
"स्वनिर्म्मितेषु निर्व्विष्टो भुङ्क्ते भूतेषु तद्-
गुणान् ॥"
विवाहित: । कृताग्निहोत्र: । यथा । "ज्येष्ठे-
निर्व्विष्टे कनीयान् निर्व्विशन् परिवेत्ता भवति ।"
इत्युद्वाहतत्त्वम् ॥

निर्व्वीजा, स्त्री, (निर्गतं वीजं यस्या: ।) काकली-
द्राक्षा । इति राजनिर्घण्ट: ॥

निर्व्वीरं, त्रि, ( निर्गतो वीरो यस्मात् । ) वीर-
शून्यम् । यथा,—
"नाकृष्टं न च टङ्कितं न नमितं नोत्थापितं
स्थानत:
केनापीदमहो महद्धनुरतो निर्व्वीरमुर्व्वी-
तलम् ॥"
इति महानाटकम् ॥

निर्व्वीरा, स्त्री, ( निर्गतो वीरवत् पति: पुत्त्रो वा
यस्या: । ) अवीरा । पतिपुत्त्रविहीना । इति
हेमचन्द्र: । ३ । १९४ ॥

निर्वृ तिः, स्त्री, ( निर् + वृ + क्तिन् । ) सुस्थिति: ।
अस्तङ्गमनम् । सुखम् । इति मेदिनी । ते,
१२० ॥ (यथा, देवीभागवते । १ । १९ । ३९ ।
"जनकस्य दशां दृष्ट्वा राज्यस्थस्य महात्मन: ।
स निर्वृतिं परां प्राप्य पितुराश्रमसंस्थित: ॥")
मोक्ष: । मृत्यु: । इति हेमचन्द्र: । १ । ७५ ॥
(शान्ति: । यथा, सुश्रुते । २ । ४१ ।
"भूतेजोवारिजैर्द्रव्यै: शमं याति समीरण: ।
भूम्यम्बुवायुजै: पित्तं क्षिप्रमाप्नोति निर्वृतिम् ॥"
विदर्भवंशीयदशार्हे: पुत्त्रे, पुं । यथा, भागवते ।
९ । २४ । ३ ।
"क्रथस्य कुन्ति: पुत्त्रोऽभूत् वृष्णिस्तस्याथ
निर्वृति: ॥")

निर्वृत्त:, त्रि, (निर् + वृत् + क्त: ।) निष्पन्न: । इत्य-
मर: । ३ । १ । १०० ॥ ( यथा, रघु: ।१७।१८ ।
"सा तस्य कर्म्मनिर्वृत्तैर्दूरं पश्चात् कृता फलै: ॥")

निर्वृत्ति:, स्त्री, ( निर् + वृत् + क्तिन् ।) निष्पाद: ।
तथा च ।
"यथा दुष्टेन दोषेण यथा चानुविसर्पता ।
निर्वृत्तिरामयस्यासौ संप्राप्तिर्ज्जातिरागति: ॥"
इति माधवकर: ॥
( निर्गता वृत्तिर्यस्मादिति । ) वृत्तिरहिते, त्रि ॥

निर्व्वेद:, पुं, ( निर् + विद् + घञ् । ) स्वावमान-
नम् । इति हेमचन्द्र: ॥ ( यथा, देवीभागवते ।
४ । १० । ३७ ।
"दैवेयैर्हि कृतं चौर्यं प्रह्लादस्तु पराजित: ।
निर्व्वेदं परमं प्राप्तो ज्ञात्वा धर्म्मं सनातनम् ॥")
स तु त्रयस्त्रिंशद्व्यभिचारिभावानामादिम: ।
शान्तरसस्य स्थायिभावश्च । यथा,—
"निर्व्वेद:स्थायिभावोऽस्ति शान्तोऽपि नवमो
रस: ॥"
इति काव्यप्रकाश: ॥
तस्य लक्षणं यथा,—
"तत्त्वज्ञानापदीर्ष्यादेर्निर्व्वेद: स्वावमाननम् ॥"
तदुदाहरणम् । यथा,—
"मृतुपिण्डवालुकारन्ध्रपिधानरचनार्थिना ।
दक्षिणावर्त्तशङ्खोऽयं हन्त चूर्णीकृतो मया ॥"
इति साहित्यदर्पणम् ॥
परवैराग्यम् । यथा,—
"तत: कदाचिन्निर्व्वेदान्निराकाराश्रितेन च ।
लोकतन्त्रं परित्यक्तं दु:खार्त्तेन भृशं मया ॥"
इति मोक्षधर्म्म: ॥
वैराग्यम् । यथा, श्रीभगवद्गीतायाम् ।
"तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ॥"
( निर्गतो वेदो यस्मादिति । ) वेदरहिते, त्रि ॥

निर्व्वेश:, पुं, ( निर् + विश् + भावे घञ् । )
भृति: । भोग: । इत्यमर: । ३ । ३ । २१४ ॥
"भृतिर्व्वेतनं भोग: सुखं पालनमभ्यवहारो वा ।"
इति भरत: ॥ ( यथा, भागवते । ६ । २ । ७ ।
"अयं हि कृतनिर्व्वेशो जन्मकोट्यंहसामपि ।
यद्व्याजहार विवशो नाम स्वस्त्ययनं हरे: ॥")
मूर्च्छनम् । इति मेदिनी । शे, २२ ॥ विवाह: ।
निर्पूर्व्वविशधातुर्व्विवाहार्थ: । इति स्मृति: ॥

निर्व्वेष्टनं, क्ली, ( नितरां वेष्टनमत्र । ) नाड़ि-
चीरम् । इति हारावली । २१४ ॥ ( निर्गतं
वेष्टनं यस्मात् ।) वेष्टनरहिते, त्रि ॥

निर्व्यथनं, क्ली, ( निर् + व्यथ + भावे ल्युट् । )
छिद्रम् । इत्यमर: । १ । ८ । २ ॥ व्यथाभाव: ।
निश्चयेन व्यथनञ्च ॥

निर्व्यूढं, त्रि, (निर् + वि + वह + क्त: । ) व्यक्तम् ।
इति त्रिकाण्डशेष: ॥ समाप्तम् । यथा,—
"अवदानन्तु यत् कर्म्म निर्व्यूढमतिशोभनम् ॥"
इति जटाधर: ॥
( स्थिरम् । यथा, "स्त्रीणां पतिपुत्त्रादिधने न
निर्व्यूढं स्वत्वं पुंसान्तु तन्निर्व्यूढं अप्रतिबन्धकतया
यथेष्टविनियोगार्हत्वात् ॥" तथा, च राज-
तरङ्गिण्याम् । ३ । ४७२ ।
"स एव भूपतिर्भूत्वा भुवं वर्षशतत्रयम् ।
निर्व्याजश्लाघ्यनिर्व्यूढपातालेश्वरमासदत् ॥" )

निर्हरणं, क्ली, ( निश्चयेन हरणम् । निर् + हृ +
ल्युट् । ) शवदाह: । यथा, शुद्धितत्त्वे ।
"तस्य निर्हरणादीनि सम्परेतस्य भार्गव ।
युधिष्ठिर: कारयित्वा सुहूर्त्तं दु:खितोऽभवत् ॥"
( दहनम् । यथा, भागवते । ७ । ७ । २८ ।
"वीजनिर्हरणं योग: प्रवाहोपरमो धिय: ॥")
नि:शेषेण हरणञ्च ॥

निर्हार:, पुं, ( निर् + हृ + घञ् । ) शल्यादेरुत्-
पाटनम् । इति भरत: ॥ तत्पर्य्याय: । अभ्यव-
कर्षणम् २ । इत्यमर: । ३ । २ । १७ ॥ मल-
मूत्रादित्याग: । यथा, आह्निकतत्त्वे ।
"आहारनिर्हारविहारयोगा:
सुसंवृता धर्म्मविदा तु कार्य्या ॥"
दाह: । इति स्मृति: ॥ (दाहार्थं नयनम् । इति
स्वामी ॥ यथा, भागवते । ७ । २ । ३५ ।
"एवं विलपतीनां वै परिगृह्य मृतं पतिम् ।
अनिच्छतीनां निर्हारमर्कोऽस्तं संन्यवर्त्तत ॥")
यथेष्टविनियोग: । यथा,—
"न निर्हारं स्त्रिय: कुर्य्यु: कुटुम्बाद्बहुमध्यगात् ।
स्वकादपि च वित्ताद्धि स्वस्य भर्त्तुरनाज्ञया ॥"
इति मनु: ॥

निर्हारी, [न्] त्रि, ( नि:शेषेण हरति दूरं गच्छ-
तीति । निर् + हृ + णिनि । ) दूरगामिगन्ध: ।
इत्यमर: । १ । ५ । ११ ॥ ( यथा, महाभारते ।
१२ । १८४ । २८ ।
"इष्टश्चानिष्टगन्धश्च मधुर: कटुरेव च ।
निर्हारी संहत: स्निग्धो रूक्षो विशद एव वा ॥")

निर्ह्राद:, पुं, (निर् + ह्राद अव्यक्तशब्दे + घञ् ।)
ध्वनि: । इत्यमर: । १ । ३ । २३ ॥ ( यथा,
रघुवंशे । १ । ४१ ।
"श्रेणीबन्धाद्वितन्वद्भि: अस्तम्भां तोरणस्रजम् ।
सारसै: कलनिर्ह्रादै: क्वचिदुन्नमिताननौ ॥" )

निलय:, पुं, ( निलीयते अस्मिन्निति । नि + ली +
"एरच् ।" ३।३।५६ । इति अधिकरणे अच् । )
गृहम् । इत्यमर: । २ । २ । ५ ॥ ( यथा, रघु-
वंशे । २ । १५ ।
"सञ्चारपूतानि दिगन्तराणि
कृत्वा दिनान्ते निलयाय गन्तुम् ॥"
आश्रयस्थानम् । यथा, भागवते । ८ । १ । ११ ।
"तं भूतनिलयं देवं सुपर्णमुपधावत ॥" )

निलिम्प:, पुं, ( निलिम्पतीति । नि + लिप् + "गौ
लिम्पेर्व्वाच्य: ।" ३।१।१३८ । इत्यस्य वार्त्तिकोक्त्या
श: । मुचादित्वान्नुम् ।) देव: । इति त्रिकाण्ड-
शेष: ॥

निलिम्पनिर्झरी, स्त्री, (निलिम्पानां देवानां निर्झरी
नदी । ) गङ्गा । यथा,—
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी ॥"
इत्यादिरावणकृतशिवस्तोत्रम् ॥

निलिम्पा, स्त्री, ( नि + लिप + श । मुचादित्वा-
न्नुम् । स्त्रियां टाप् ।) स्त्रीगवी । इति त्रिकाण्डशेष: ॥

निलिम्पिका, स्त्री, ( निलिम्पा एव । स्वार्थे कन्
टापि अत इत्वम् । ) सौरभेयी । इति हेम-
चन्द्र: । ४ । ३३२ ॥

निलीनं, त्रि, ( नि:शेषेण लीनं संलग्नम् । नि +
ली + क्त: । ) नि:शेषेण लीनम् । संलग्नम् ।
(यथा, भट्टि: । २ । ५ ।
"वनानि तोयानि च नेत्रकल्पै:
पुष्पै: सरोजैश्च निलीनभृङ्गै: ।
परस्परं विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण ॥"

निवपनं, क्ली, ( नि + वप + भावे ल्युट् । ) पितृ-
देश्यकदानम् । इति शब्दरत्नावली ॥ ( यथा,
महाभारते । १३ । ९२ । २ ।
"ऋषयो धर्म्मनित्यास्तु कृत्वा निवपनान्युत ।
तर्पणञ्चाप्यकुर्व्वन्त तीर्थाम्भोभिर्यतव्रता: ॥" )

निवरा, स्त्री, ( नितरां व्रियत इति । नि + वृ +
"ग्रहवृदृनिश्चिगमश्च ।" ३।३।५८ । इति कर्म्म-
ण्यप् । ततष्टाप् । ) कुमारी । अविवाहिता ।
इति मिताक्षरा ॥